अध्याय :- ४३ Chapter-43

श्री नारद उवाच ।।
ततोऽहं पार्थ भूयोऽपि जनानुग्रहकाम्यया ।।
प्रत्यक्षदेवं मार्तंडमत्रानेतुमियेष ह[१] ।। १

सर्वेषां प्राणिनां यस्माद्दृष्टपो भगवान्रविः ।।
इहामुत्र च कौंतेय विष्णुवोद्धारी रविर्मतः ।। २

ये स्मरंति रविं कीर्तियंति च ये नराः ।।
[२]पूजयंति च ये नित्यं कृतार्थस्ते न संशयः ।। ३

सूर्यभक्तिपरा ये च नित्यं तद्गतमानसाः ।।
ये स्मरंति सदा सूर्यं न ते दुःखस्य भाजिनः ।। ४

भवनानि मनोज्ञानि विविधाभरणाः स्त्रियः ।।
धनं चादष्टपर्यंतं सूर्यपूजाविधेः फलम् ।। ५

दुर्लभा भक्तिः[३] सूर्ये वा दुर्लभं तस्य चार्चनम् ।।
दानं च दुर्लभं तस्मै ततो होमश्च दुर्लभः ।। ६

नमस्कारादि संयुक्तं रविरित्यक्षरद्वयम् ।।
जिह्वाग्रे वर्तते यस्य सफलं तस्य जीवितम् ।। ७

---

१ अ. 'त' पाठः
२ ब. 'प्र' अत आरंभ्यते ।
३ अ. भक्ति

653

इत्यहं त्वदि संचिंत्यं माहात्म्यं रविजं महत्‌ ॥
पूर्णं वर्षशतं पार्थ रविं[१] भक्त्या ह्यतोषयम्‌ ॥ ८

जपेन सुविशुद्धेन च्छन्दसां वायु भक्षजनः ॥
ततः[२] खाद्वितीयां मूर्तिं कृत्वा योग बलाद्विभुः ॥ ९

तेजसा दुर्दशो भास्वान्प्रत्यक्षः समजायत्‌ ॥ १०

तमहं प्रांजलिर्भूत्वा नमस्कृत्य रविं प्रभुम्‌ ॥
सामभिर्विविधैर्देवं पर्यतोषयमीश्वरम्‌ ॥ ११

तुष्टो मामाह वरदो देवर्षे सुचिरं त्वया ॥
तपसाराधितोऽस्मीति वरं वृणु यथेप्सितम्‌ ॥ १२

इत्युक्तोहं लोकनाथं प्रांजलिः प्रास्तुवं वचः ॥
यदि तुष्टो भवान्मह्यं यदि देयो वरो मम ॥ १३

ततस्ते कामरूपे या कला[३]नाथ प्रवर्तते ॥
राजवर्धनराज्ञा याऽराधिता च जनैः पुरा ॥ १४

---

१ ब. रवि
२ ब. तत
३ ब. काला

तया च कलया भानो सयात्र स्थातुमर्हसि ।।
ततस्तथेति देवेन प्रोक्ते तुष्टेन भारत ।। १५

अस्थापयमहं सूर्यं भट्टादित्याभिधानकम् ।।
भट्टेन स्थापितं यस्मान्मया तस्मार्द्विजगौ।। १६

ततः संपूज्य तं पुष्पैः[१] कृतावेशमहं रविम् ।।
भक्त्युद्रेकाप्लुतांगोऽथ स्तुतिमेतामथाचरम् ।। १७

सर्ववेदरहस्यैश्च नामभिश्च शताष्टभिः ।।
सप्तसप्ति चिंत्यात्मा महाकारुणि कोत्तमः ।। १८

संजीवनो जयो जीवो जीवनाथो जगत्पतिः ।।
कालाश्रयः कालकर्ता महायोगी महामतिः ।। १९

भूतांत करणो देवः कमलानन्द नन्दनः ।।
सहस्त्रपाच्च वरदो दिव्य कुण्डल मण्डितः[२] ।। २०

धर्मप्रियोचितात्मा च सविता वायुवाहनः ।।
आदित्योऽक्रोधनः सूर्यो रश्मिमाली विभावसुः ।। २१

---

१ अ. पुष्पे
२ ब. तम

दिनकृदिनृत्दन्यौनी सुरथो रथिनां वरः ।।
राशीपतिः स्वर्णरेताः पूषा त्वष्टा दिवाकरः ।। २२

आकाशतिलको धाता संविभागी मनोहरः ।।
प्राज्ञः[१] प्रजापतिर्धन्यो विष्णुः श्रीशो भिषग्वरः ।। २३

आलोकल्लोकनाथो लोकपाल नमस्कृतः ।।
विदिताशयश्चैव सुनयो महात्मा भक्तवत्सलः ।। २४

कीर्ति कीर्ति करो नित्यो रोचिष्णुः कल्मषापहः ।।
जितानन्दो महावीर्यो हंसः संहार कारकः ।। २५

कृत कृत्यः[२] सुसंगश्च[३] बहुज्ञो वचसां पतिः ।।
विबुध पूजयो मृत्युहारी घृणी धर्मस्य कारणम् ।। २६

प्रणतार्ति हरो रोग आयुष्मान्सुखदः सुखी ।।
मङ्गलं पुण्डरीकाक्षो व्रती व्रतफलप्रदः ।। २७

शुचिः पूर्णो मोक्ष मार्ग दाता भोक्ता महेश्वरः ।।
धन्वंतरिः[४] प्रियभाषी धनुर्वेद विदेकराट् ।। २८

---

१ ब. प्राज्ञ

२ ब. कृत्य

३ अ. ब. स्त्व संगश्च

४ ब. धन्वंतरी

जगत्पिता धूमकेतुर्विधूतो ध्वांतहा गुरुः ।।
गोपतिश्च कृतातिथ्य शुभाचारः शुचिप्रियः ।। २९

सामप्रियो लोकबन्धुर्नैकरूपो युगादिकृत् ।।
धर्मसेतुर्लोकसाक्षी खेटकः सर्वदः[१] प्रभुः ।। ३०

मयैवं संस्तुतो भानुर्नाम्नामष्ट शतेन च ।।
तुष्यतां सर्वलोकानां सर्वलोक प्रियो विभुः ।। ३१

इत्येवं संस्तवात्प्रीतो भास्करो मामवोचत ।।
सदात्र कलया स्थास्ये देवर्षे त्वत्प्रियेप्सया ।। ३२

यो मामत्र महाभक्त्या भद्रादित्यं प्रपूजयेत् ।।
सहस्त्रशः कामरूपे संपूज्याप्नोति तत्फलम् ।। ३३

मामुद्दिश्य च यो विप्रः स्वल्पं वा यदि वा बहु ।।
दास्यतेऽत्राक्षयं तच्च ग्रहीष्ये करजं[२] यथा ।। ३४

रक्तोत्पलैश्च कल्हारैः कैसरैः कर[३]वीरकैः ।।
शतत्रयैर्महायध्ने रविवारेण मानवः ।। ३५

---

१ अ. सर्वदा
२ ब. करज
३ ब. कण

सप्तम्यामथ षष्ठ्यां वा येऽर्चयिष्यंति मामिह ।।
यान्यान्प्रार्थयते कामांस्तांस्तान्प्राप्स्यति निश्चितम् ।। ३६

दर्शनान्मम भक्त्या च नाशो व्याधिदरिद्रयोः ।।
प्रणामात्स्वर्गमाप्नोति श्रुत्वा मोक्षं च नित्यशः ।। ३७

अभिक्तं यश्च कर्ता मे स गच्छेन्निश्चितं क्षयम्[१] ।।
अष्टोत्तरशतं नाम ममाग्रे यत्त्वयेरितम् ।। ३८

त्रिकालमेककालं वा पठतः श्रृणु यत्फलम् ।।
कीर्तिमान्सुभगो विद्वान्सुसुखी प्रियदर्शनः ।। ३९

भवेद्वर्षशतायुश्च सर्वरोग विवर्जितः ।।
यस्त्विदं श्रृणुयान्नित्यं पठेद्वा प्रयतः शुचिः ।। ४०

अक्षयं स्वल्पमप्यन्नं भक्तैस्योप साधितम् ।।
विजयी च भवेन्नित्यं तथा जातिस्मरो भवेत् ।। ४१

तस्मादेतत्त्वया जाप्यं परं स्वस्त्ययनं महत् ।।
तथा ममाग्रे कुंड च कुरु स्नानार्थमुत्तमम् ।। ४२

---

१ ब. क्षय
२ अ. या

कामरूपकला यत्र तत्र कुंड वने[1] भवेत् ।।
एवं दत्त्वा वरान्भानुस्तत्रैवां तरधीयत ।। ४३

ततो[2] भास्कर वाक्येन सिद्धेशस्य च सव्यतः ।।
वनमध्ये मया कुंडं कृतं दर्भशलाकया ।। ४४

कामरूप भवं कुंडं वृक्षास्ते चापि भारत ।।
संलीनास्तन्महाश्चर्यं ममाजायत चेतसि ।। ४५

माघमासस्य शुक्लायां सप्तमयां स्त्री नरोऽपि वा ।।
स्नानं कुंडे शुभं कृत्वा भट्टादित्यं प्रपश्यति ।। ४६

तस्यानंतं भवेत्पुण्यं रथं यश्च प्रपूरयेत् ।।
रथयात्रां च कुरुते यस्मिन्यस्मिन्नसौ पथि ।। ४७

ये च पश्यंति लोकास्ते धन्याः सर्वे न संशयः ।।
पुत्र धान्य धनैर्युक्ता नीरुजस्तेजसाऽन्विताः ।। ४८

भविष्यंति नरास्ते ये कारयंति रथोत्सवम् ।।
गंगादिसर्व तीर्थेषु यत्फलं कीर्तितं बुधैः[3] ।। ४९

---

१ अ. ब. वनं
२ ब. वातो
३ ब. बुधेः

भट्टादित्यस्य[1] कुंडे च तत्फलं सप्तमीदिने ।।
तत्र कुंडे च यः स्नात्वा सूर्यायार्घ्यं प्रयच्छति[2] ।।
कपिलागोश तस्यासौ दत्तस्य फलमश्नुते ।। ५०

अर्जुन उवाच ।।[3]
वासुदेवादयः सर्वे वदंत्येवं महामुने ।। ५१

भास्करार्घं विना प्रातः कृतं सर्वं च निष्फलम् ।।
तस्याहं श्रोतुमिच्छामि विधिं विधिविदां वर[4] ।। ५२

नारद उवाच ।।[5]
यथा ब्रह्मादयो देवा यच्छेत्यर्घं महात्मने[6] ।।
भास्कराय शृणुत्वं तं विधिं सर्वाधिनाशनम् ।। ५३

प्रथमं तावत्प्रत्यूषे उदिते सूर्ये शुचिर्भूत्वा गोमयकृत म—
मंडलस्योपरि रक्तचंदनेन मंडलकं कृत्वा तन् मध्ये हेमाक्षतदूर्वादधि
सर्पींर्षि परिक्षिप्य स्थापयेत ।। ५४

स्वशरीरमालभेत् ह/ब अनेन मंत्रेण ।।
ॐ खखोल्काय नमः सप्तवारानुच्चार्य स्थातव्यम् ।।
निपात्य सूर्याभिमुखस्तद्गतमना भूत्वार्घमंत्र मुदा हरेत् ।।
तदुच्यते सूर्यवक्त्राद्विनिर्गतमिति ।। ५५

यस्योच्चारण शब्देन रथं संस्थाप्य भास्करः ।।
प्रतिगृह्णाति चैवार्घ्यं वराभिष्टं च यच्छति ।। ५६

---

१. अ. प्रती त्रुटितं । ब. मदादित्य    २. अ. प्रयछ्ति ।।
३ ब. अर्जुनोवाच    ४ ब. वरः
५ अ. ब. श्री नारद ।।    ६ ब. महामुने

ॐ यस्वाहुः सप्त ऽच्छंदांसि रथे तिष्ठंति वाजिनः ।।
अरुणः सारथिर्यस्य रथवाहोऽग्रतः स्थितः ।। ५७

जया च विजया चैव जयंती पापनाशनी[1] ।।
इडा च पिंगला चैव वहंतोऽश्वमुखास्तथा ।। ५८

डिंडिश्च शेषनागश्च गणाध्यक्षस्तथैव च ।।
स्कंदरेवंततार्क्ष्यश्च तथा कल्माषपक्षिणौ ।। ५९

राज्ञी च निक्षुभा देवी ललिता चैव संज्ञिका[2] ।।
तथा यज्ञभुजो देवा ये चान्ये परिकीर्तिताः[3] ।। ६०

एभिः परिवृतो योऽसावधरोत्तरवासिभिः ।।
तमहं लोककर्तारमाह्वयामि तमोपहम् ।। ६१

अम्मयो भगवान्भानुरमुं यज्ञं प्रवर्तयन्[4] ।।
इदमर्घ्यं च पाद्यं च प्रगृहाण नमोनमः ।। ६२

आवाहनम् ।।
सहस्त्र ऽकिरण वरद जीवनरूप ते[5] नमः ।।
इति सांनिध्य करणम्[6] ।।
गृहाण पूजां च प्रसादं च धिया कुरु ।।
तिष्ठ ऽ त्वं तावदत्रैव यावत्पूजां करोम्यहम् ।। ६३

---

१ 'नाशिनी' अ. ब. पाठः ।
२ ब. संज्ञिता
३ अ. ता
४ अ. प्रवर्त्तकः
५ अ. 'यां' । ब. 'त्वां'
६ ब. कारणं

एवं विज्ञापनं[१] दद्यादनेन मंत्रेण कमलासनम् ।।
तत्कमलासनं कमलनंदन उपाविशति ++
आसन उपविष्टस्य श्रीदेवानां पूजां नियोजयेत अनेन विधानेन ।।
ॐ सोमैमूर्ति क्षीरोदपतये नमः ।। ६४

ततो यज्ञोपवीतं दद्यात् अनेन मंत्रेण ।।
सूत्रतंतुमयं शुद्धं पवित्रमिदमुत्तमम् ।।
यज्ञोपवीतं देवेश प्रगृहाण नमोऽस्तु ते ।। ६५

मुकुटो रत्नबद्धोयं मुद्रिका भूषणानि च ।।
अलंकारं गृहाणेमं मया ~~भूषणानि~~ भक्त्या समर्पितम् ।। ६६

एवमलंकारं निवेद्य ~~मृगा~~ पश्चात्केशरकुंकुमकर्पूर –
– रक्तचंदन मिश्रमनुलेपनं दद्यात् ।। ६७

ॐ तवातिप्रिय वृक्षाणां रसोऽयं तिग्मदीधिते ।।
स तवैवोचितः स्वामिन्गृहाण कृपया मम ।। ६८

ततश्चंपकजपाकर वीरकर्णिकेसर
कौकनदादिभिः पूजां कुर्यात् ।। ६९

ॐ[२] वनस्पतिरसो दिव्यो गंधाढ्यो गंध उत्तमः ।।
आहारः[३] सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ।। ७०

---

१ 'विज्ञापन' अ. प्रतौ त्रुटितम् ।
२ ब. प्रतौ नास्ति
३ ब. अहारः

शल्लकीधूप मंत्रः[1] ।।
ततः पायसादिनिष्पन्नं नैवेधं निवेदयेदनेन मंत्रेण ।।
नैवेद्यममृतं सर्वभूतानां प्राणवर्धनम् ।।
पूर्णपात्रे मया दत्तं प्रतिगृहण प्रसीद मे ।। ७१

ततो भूयो नमस्य हेमवस्त्रो पवीतालंकारान् ।।
ब्राह्मणाय निवेद्य निर्माल्यं संत्दत्याभसिनिक्षिपेत् ।। ७२

इत्यर्ध्यदान विधिः ।।
य एवं[2] भास्करायार्ध्यं मूर्तौ मंडलके/पि वा ।।
नित्यं निवेदयेत्प्रातः स्यादवैरात्मवत्प्रियः ।। ७३

अनेन विधिनाकर्णो भास्करार्ध्यं प्रयच्छति ।।
ततः सूर्यस्य पार्थासावात्मवद्वल्लाभो मतः ।। ७४

अशक्तश्चेन्नित्य मेकमर्ध्यं दधादिवा[3]कृते ।।
ततो/त्र रथसप्तम्यां कुंडे देयः प्रयत्नतः ।। ७५

अश्वमेघफलं प्राप्य सूर्यलोकमवाप्नुयात् ।।
तस्मात्सर्व प्रयत्नेन दातव्यो/र्घोत्र भारत ।। ७६

एवंविधस्त्वसौ देवो भट्टादित्यो/त्र तिष्ठति ।।
भूयानतो/पि बहुशः पापहाधर्मवर्धनः ।। ७७

दिव्यमष्टविधं चात्र सद्यः प्रत्ययकारकम् ।।
पापानां चौपभुक्तं हि यथा पार्थ हलाहलम् ।। ७८

*४ इति श्री स्कांदे..... भट्टादित्य माहात्म्य वर्णनं नाम त्रिचत्वारिंशो/ध्यायः।।

---

१ अ. धूपमंत्रः ।। ब. धूपमंत्र ।। २ ब. एव ३ ब. करे ।।
*४ अ. इति श्री स्कंद पुराणे कुमारिकाखंडे भट्टादित्य माहात्म्यं ।।
ब. इति श्री स्कंदपुराणे कुमारिकाखंडे भट्टादित्य माहात्म्ये तृतीयचत्वारिंशो/ध्यायः ।।४३।।